तच्च शर्व्व! वश्यं कुर्य्यान्नात्र कार्य्या विचारणा।
नागेश्वरञ्च शैलेयं त्वक्पत्रञ्च हरीतकी॥
चन्दनं कुष्ठसूक्ष्मैला रक्तशालिसमन्विता।
एतैर्धूपो वशकरः स्मरवाणा इवेश्वर!॥
रतिकाले महादेव! पार्व्वतीप्रिय! शङ्कर!।
निजशुक्रं गृहीत्वा तु वामहस्तेन यः पुमान्॥
कामिनीचरणं वामं लिम्पेत् स स्यात् स्त्रियाः प्रियः।
सैन्धवञ्च महादेव। पारावतमलं मधु॥
एभिर्लिप्तन्तु लिङ्गं वै कामिनीवशकृद्भवेत्।
पुष्पाणि पञ्चरक्तानि गृहीत्वा यानि कानि च॥
तण्डुलञ्च प्रियङ्गुञ्च पेषयेदेकयोगतः।
अनेन लिप्तलिङ्गस्य कामिनीवशतामियात्॥
हयलाला च मञ्जिष्ठा मालतीकुसुमानि च।
श्वेतसर्षपाख्यैतैश्च लिप्तलिङ्गः स्त्रियाः प्रियः॥
मूलन्तु काकजङ्घाया दुग्धपीतन्तु शोषनुत्।
अश्वगन्धानागबलागुड़मांसनिषेविणाम्॥
रूपं भवेत् यथा तद्वन्नवयौवनचारिणाम्॥
लौहचूर्णसमायुक्तं त्रिफलाचूर्णमेव वा।
मधुना खादितं रुद्र! परिणामाख्यशूलनुत्॥
क्वथितोदकपानन्तु शम्बूकाक्षारकं तथा।
मृगशृङ्गं ह्यग्निदग्धं गव्याज्येन समन्वितम्।
पीतं हृत्पृष्ठशूलानां भवेन्नाशकरं शिव!॥
हिङ्गु सौवर्चलं रुद्र! वृषध्वज! महौषधम्।
एभिस्तु क्वथितं वारि पीतं वै सर्व्वशूलनुत्॥
अपामार्गस्य वै मूलं सामुद्रलवणान्वितम्।
आखादितमजीर्णस्य शूलस्य स्याद्विमर्द्दकम्॥
वटरोहाङ्कुरो रुद्र! तण्डुलोदकघर्षितः।
पीतः सतक्रोऽतीसारं क्षयं नयति शङ्कर!॥
अङ्कोठमूलं कर्षार्द्धं पिष्टं तण्डुलवारिणा।
सर्व्वातिसारग्रहणीं पीतं हरति भूतप!॥
मरीचशुण्ठिकुटजत्वक्चूर्णन्तु गुड़ान्वितम्।
क्रमात्तद्द्विगुणं पीतं ग्रहणीव्याधिनाशनम्॥
श्वेतापराजितामूलं हरिद्रासिक्थतण्डुलम्।
अपामार्गत्रिकटुकमेषान्तु वटिकां शिव!।
विसूचिकामहाव्याधिं हरत्येव न संशयः॥
त्रिफला त्रिकटुश्चैव शिलाजतु हरीतकी।
एकैकमेषां चूर्णन्तु मधुना च विमिश्रितम्।
पीतं सर्व्वप्रमेहन्तु क्षयं नयति शङ्कर!॥
अर्कक्षीरं प्रस्थमेकं तिलतैलं तथैव च।
मनःशिला मरीचानां सिन्दूरस्य पलं पलम्॥
चूर्णं कृत्वा ताम्रपात्रे त्वातपे शोषयेत्ततः।
पीतं स्नुहीगतं दुग्धं सैन्धवं शूलनुद्भवेत्॥
त्रिकटुत्रिफलायुक्तं पलाशाष्टकसैन्धवम्।
मनःशिला निम्बपत्रं जातीपुष्पमजापयः॥
तन्मूत्रं शङ्खनाभिश्च चन्दनं घर्षयेत्ततः।
एभिश्च वटिकां कृत्वा अक्षिणी चाञ्जयेत्ततः॥
नश्यते पटलं काचं पुष्पञ्च तिमिरादिकम्॥
विभीतकस्य वै चूर्णं समधु श्वासनाशनम्॥
पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसंयुतम्।
सर्व्वरोगज्वरश्वासशोषपीनसहृद्भवेत्॥
देवदारोश्च वै चूर्णं अजामूत्रेण भावयेत्।
एकविंशति वै वारमक्षिणी तेन चाञ्जयेत्॥

राज्यन्धता पटलता नश्येदिति विनिश्चयः।
पिप्पली केतकं रुद्र! हरिद्रामलकं वचा॥
सर्व्वाक्षिरोगा नश्येयुः सक्षीरादञ्जनात्ततः॥
काकजङ्घाशिग्रुमूले मुखेन विधृते शिव!।
चर्व्वित्वा दन्तरोगाणां विनाशो हि भवेद्धर"!॥
इति गारुड़े १८९ अध्यायः॥ * ॥

हरिरुवाच।

"पीतं सारं गुड़ूच्याश्च मधुना च प्रमेहनुत्।
पीतं गोहालियामूलं तिलदध्याज्यसंयुतम्॥
निरुद्धमूत्रं क्वथितं प्रवर्त्तयति शङ्कर!।
तथा हिक्कां हरेत् पीता सौवर्चलयुता सुरा॥
गोरक्षकर्क्कटीमूलं पिष्टं वास्योदकेन च।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्क्कराम्॥
पिष्टं वै मालतीमूलं ग्रीष्मकाले समाहृतम्।
साधितं छागदुग्धेन पीतं शर्क्करयान्वितम्॥
हरेन्मूत्रनिरोधञ्च हरेद्वै पाण्डुशर्क्कराम्॥
द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा।
गण्डमालां हरेल्लेपात् कुरण्डगलगण्डकम्॥
रसाञ्जनहरीतक्याश्चूर्णं तेनैव गुण्डनात्।
नश्येद्वै पुरुषव्याधिं नात्र कार्य्या विचारणा॥
करवीरमूललेपात् लेपात् पूगफलस्य च।
पुंव्याधिर्नश्यते रुद्र! योगमन्यं वदाम्यहम्॥
दन्तीमूलं हरिद्रा च चित्रकं तस्य लेपनात्।
भगन्दरविनाशः स्यादन्ययोगं वदाम्यहम्॥
जलौकाजग्धरक्तान्तु भगन्दरमुमापते!॥
त्रिफलाजलघृष्टञ्च मार्जाराख्यिविलेपितम्।
ततो न प्रसवेत् रुद्र! नात्र कार्य्या विचारणा॥
हरिद्रा त्वेकवारन्तु स्नुहीक्षीरेण भाविता।
झटित्यर्शो निपतति तल्लेपात् वृषभध्वज!॥
घोषाफलं सैन्धवञ्च तल्लिप्तार्शः पतेत्तथा।
गव्याज्यं साधितं पीतं पलाशक्षारवारिणा॥
त्रिगुणेन त्रिकटुकमर्शांसि क्षययेच्छिव!।
विल्वस्य च फलं दग्धं रक्तार्शसो विनाशनम्॥
जग्ध्वा कृष्णतिलान्येव नवनीतयुतानि च।
यवक्षारं शुण्ठिचूर्णं युक्तं तुल्यघृतान्वितम्॥
लीढ़मग्निं करोत्येष प्रत्युषे वृषभध्वज!।
शुण्ठ्या च क्वथितं वारि पीतञ्चाग्निं करोति वै॥
हरीतकी सैन्धवञ्च चित्रकं रुद्र! पिप्पली।
चूर्णमुष्णोदकेनैषां पीतञ्चातिक्षुधाकरम्॥
साज्यं शूकरमांसं वै पीतं चातिक्षुधाकरम्"॥
इति गारुड़े १९० अध्यायः॥ * ॥

हरिरुवाच।

"हस्तिकर्णस्य वै मूलं गृहीत्वा चूर्णयेद्धर!।
सर्व्वरोगविनिर्मुक्तं चूर्णं पलशतं शिव!॥
सक्षीरं भक्षितं कुर्य्यात् सप्ताहेन वृषध्वज!।
नरं श्रुतिधरं शूरं मृगेन्द्रगतिविक्रमम्॥
पद्मगौरप्रतीकाशं युक्तं दशशतायुषा।
षोड़शाब्दाकृतिं रुद्र! सततं दुग्धभोजनम्॥
मधुसर्पिःसमायुक्तं जग्धमायुष्करं भवेत्।
तज्जग्धं मधुना सार्द्धं दशवर्षसहस्रिणम्॥
कुर्य्यान्नरं श्रुतिधरं प्रमदाजनवल्लभम्।
दध्ना नित्यं भक्षितन्तु वज्रदेहकरं शिव!॥

कृष्णकेशसमायुक्तं नरं वर्षसहस्रिणम्।
तच्च काञ्जिकसंयुक्तं नरं कुर्य्याच्च भक्षितम्॥
शतशर्षं दिव्यदेहं वलीपलितवर्जितम्।
जग्धं त्रिफलया युक्तं चक्षुष्मन्तं करोति वै॥
अन्धः पश्येत्तु चूर्णस्य साज्यस्यैव तु भक्षणात्।
महिषक्षीरसंयुक्तं तल्लेपः कृष्णकेशकृत्॥
खल्लीटस्य च वै केशा भवन्ति वृषभध्वज!।
तैलयुक्तेन चूर्णेन वलीपलितवर्जितम्॥
तदुद्वर्त्तनमात्रेण सर्व्वरोगैः प्रमुच्यते।
सच्छागक्षीरचूर्णेन दृष्टिः षण्मासतोऽञ्जनात्॥
पलाशस्य तु वीजानि श्रावणे वितुषाणि च।
गृहीत्वा नवनीतेन तेषां चूर्णन्तु भक्षयेत्॥
कर्षार्द्धमेव कुल्माषं नत्वा नित्यं हरिं प्रभुम्।
षष्टिं पुराणधान्यं स्यादम्बुवर्ज्जं वृषध्वज!॥
जीवेद्वर्षसहस्राणि वलीपलितवर्जितः॥
भृङ्गराजस्य वै चूर्णं पुष्यर्क्षे तु समाहृतम्।
विड़ालपदमात्रन्तु ससौवीरञ्च भक्षयेत्।
मासमात्रप्रयोगेण वलीपलितवर्जितः॥
शतानि पञ्च जीवेच्च नवनागबलो भवेत्।
भवेत् श्रुतिधरो रुद्र! पुष्यर्क्षे चैव भक्षयेत्"॥
इति गारुड़े १९१ अध्यायः॥ * ॥

हरिरुवाच।

"निर्व्रणः स्यात् पूयहीनः प्रहारो घृतपूरितः।
अपामार्गस्य वै मूलं हस्ताभ्याञ्च विमर्द्दयेत्॥
तद्रसेन प्रहारस्य रक्तस्रावो न पूरणात्।
रुद्र! लाङ्गलिकामूलं हिज्जलस्य तथैव च॥
तेन व्रणमुखं लिप्तं शल्यो निःसरति व्रणात्।
चिरकालप्रविष्टोऽपि तेन मार्गेण शङ्कर!॥
दध्ना माहिषेण युक्तं जग्धं कोद्रवभक्तकम्।
कङ्कुमूलस्य वै चूर्णं दत्तं नाड़ीव्रणापहम्॥
ब्रह्मयष्टिफलं पिष्टं वारिणा तेन लेपतः।
तेन दुष्टं रक्तदोषः प्रणश्यति न संशयः॥
यवभस्म विड़ङ्गञ्च गन्धपाषाणमेव च।
शुण्ठिरेषाञ्चैव चूर्णं भावितं रुधिरेण वै।
कृकलाशस्य तल्लिप्तं अर्व्वुदं विद्रवेच्छिव!॥
शोभाञ्जनस्य वीजानि यतसीमसिना सह।
गोरसन्तु प्रपिष्टान्यत् ग्रन्थिकं नाशयेद्धि वै॥
श्वेतापराजितामूलं पिष्टं तण्डुलवारिणा।
तेन नस्यप्रदानात् स्याद्भूतवन्दस्य विद्रवः॥
अगस्त्यपुष्पनस्यो वै समरीचश्च भूतहृत्॥
भुजङ्गवर्म्म वै हिङ्गु निम्बपत्राणि वै यवाः।
गौरसर्षप एभिः स्याल्लेपो भूतहरः कृतः॥
गौरोचना मरीचानि पिप्पली सैन्धवं मधु।
अञ्जनं कृतमेभिः स्यात् ग्रहभूतहरं शिव!॥
गुग्गुलूलूकपुच्छाभ्यां धूपो ग्रहहरः कृतः।
चातुर्थिकज्वरैर्मुक्तः कृष्णवस्त्रावगुण्ठितः"॥
इति गारुड़े १९२ अध्यायः॥ * ॥

हरिरुवाच।

"श्वेतापराजितापुष्परसेनाक्ष्णोश्च पूरणे।
पटलं नाशमायाति ह्येतदुत्तममौषधम्॥
मूलं गोक्षुरकस्यैव चर्व्वित्वा नीललोहित!।
दन्तकीटव्यथां नश्येदन्धासुरविमर्द्दन!॥